शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)
कृष्णयजुष	सायणाचार्य	धर्म	अपूर्ण	-	3/8	130	संस्कृत	कागद	8	25	

M-2982

अलेनतां बोद्धुं राक्यार्थमात्रस्यावगतिः क्रियते स्फुटा
कल्पः शातरुद्रियं जुहोति जर्त्तिलयवाग्वा वा गवीधु
कयवाग्वा वा जर्त्तिलगवीधुकसक्तुभिर्वा कुनापयस
पिबाजाक्षीरेण मृगी रेण वार्कपर्णेनोरु तिष्ठन्नु
त्तरस्य पक्षस्योत्तरापरस्य स्याणु स्तत्त्याधिकरणं पा
स्य यमात्राया मनुपरिचारं वा नमस्ते रुद्र मन्यव इत्ये
तानवावाकांस्त्रेधा विभज्यापि चात्र प्रथमादुपक्रम्य

श्री

रु

२ नमस्तक्षभ्यइतिजानुदघ्नेधारयमाणेनरथकारेभ्यश्च
वोनमइसुपक्रम्यनमःस्वायुधायेतिनाभिदघ्नेबिल
श्रागवतानभ्यःश्रास्यदघ्नेकुत्वासहस्राणिसहस्रशाइति
न दद्गवहानाकुत्वाऽवारोहाननुहातिनमोरुद्रेभ्योयेपृथि
व्यामितिजानुदघ्नेधारयमाणेनमोरुद्रेभ्योयेन्तरिक्षइ
तिनाभिदघ्नेनमोरुद्रेभ्योयेदिवीत्यास्यदघ्नेकुत्वेतान २
वयजमानंवाचयित्वैतानेवविपरीतान्प्रसवरोहाकुत्व

संचरेप श्रूनामर्कपर्णमुदस्यतियंद्दिष्यात्तस्यसंचरति तत्र
प्रथमानुवाके प्रथमामन्त्रमाह ॥ ॥ नमस्तेरुद्र मन्यवउतो
तइषवेनमः ॥ नमस्ते अस्तुधन्वनेबाहुभ्यामुततेनमः ॥ हे
रुद्रतेत्वदीयोयोमन्युः कोपस्तस्मैनमोस्तुसमन्युरस्मद्वै
रिष्वेवप्रसरतांनत्वस्मासु उतो अपिचइषवेनमः त्व
दीयायबाणायनमोस्तु ॥ तथातेधन्वनेत्वदीयधनुषे
नमोस्तु ॥ उत अपिचतेबाहुभ्यांधनुर्बाणोपेताभ्यांह
स्ताभ्यांनमोस्तु ॥ एतत्सर्वंवैरि[illegible] प्रवर्त्ततां ॥

मयीत्यभिप्रायः अथद्वितीयामृचमाह यातइषुःशि
वतमाशिवंबभूवतेधनुः शिवाशरव्यायातवतयानो
नोरुद्रमृडय हेरुद्रत्वदीयायेयमिषुःशिवतमाशांत
मावभूव तथात्वदीयंयद्धनुःशांततमंवभूव यात्ववश
रव्यात्वेषुधिः तयाशांतयाइषुधातेनवशांतेनधनुषातया
वशांतयाशरव्ययानोस्मान्मृडयसुखय भक्तेष्वस्मत्स्वसभा
वःतेषांशांतत्वं तृतीयामृचमाह यातेरुद्रशिवातनूर २
घोरापापकाशिनी तयानस्तनुवाशांतमयागिरिशंता

भिचाकशीहि द्वेहिरुद्रस्यतन्वस्तथाचोपरिष्टाद्दाम्नास्यते
रुद्रोवाएषयदग्निस्तस्यैतेतनुवौघोरान्याशिवान्येति हिंस
काघोरा अनुग्राहिकाशिवाहेरुद्रत्वयातन्नःशिवाआस्मा
स्वनुग्रहकराअतएवाघोराहिंसकानभवति अघोरत्वमे
वस्पष्टीक्रियते अपापकाशिनी पापंहिंसारूपंअनिष्टं
काशयतीतिपापकाशिनी तद्रहीनभवतीत्यपापकाशि
नी गिरौकैलासेस्थित्वानिसंप्राणिभ्यायःशंसुखंतनोति

सगिरिशांतस्तस्यसंबोधनंगिरिशांत तथाहेरुद्रत्वंतम
या अतिशयेनसुखकारिण्यातयातनुवा अभिचाकशी
हि मामभिलक्ष्यप्रकाशंकुरु ताहशी त्वदीयांतनुंप्रकाश्य
मांसुखिनंकुर्विसर्थः अथचतुर्थीमृचमाह यामिषुं
गिरिशांतहस्तेबिभर्ष्यस्तवे शिवांगिरित्रतांकुरुमाहिं
सीःपुरुषंजगत हेगिरिशांतयामिषुंबाणंअस्तवेवैरि
षुप्रक्षेसुहस्तेबिभर्षि गिरिंकैलासाख्यंत्रायतेपालय

तीतिगिरित्र: तथाविधहेरुद्रतांहस्तेध तान्सुंग्रिवामस्मा
सुत्राँतांकुरु पुरुषमस्मदीयंमनुष्यं जगन्मनुष्यव्यतिरिक्त
मपिजंगमंगवादिकंमाहिं॥ सी: अथपंचमीमन्त्रमाह
शिवेनवचसात्वागिरिशाच्छावदामसि यथान:सर्वमि
जगदयक्ष्मं॥ सुमनाअसत गिरौकैलासेशेतेतिष्ट
तीतिगिरिशः हेगिरिशात्वामच्छप्राप्तुंशिवेनमंगलेनस्तु
तिरूपेणवचसावदामसि वयंप्रार्थयामहे यथायेनप्रका
रेणनोऽस्मदीयंसर्वमिज्जगत सर्वमपिमनुष्यपश्वादिकंजंग
श्वो

मजातं अयक्ष्मं अरोगं सुम नाअसत् सौमनस्योपेतं भवतित
थाकुरु अथषष्ठमामृचमाह अध्यवोचदधिवक्ताप्रथमो
दैव्योभिषक् अहीँश्च सर्वाञ्जंभयंत्सर्वाश्च यातुधान्यः
योरुद्रो अधिवक्ता अधिकोयमिसेवंसर्वेषामग्येमांप्रतिवक्तुं
क्षमः तेनोक्तेसतिममसर्वाधिक्यंतदानीमेवजातमितिअ
तस्ताद्रुद्रोरुद्रो अध्यवोचत् ममसर्वाधिक्यंवक्तु कीदृ
शोधिवक्ताप्रथमः ।। देवानांमध्येमुख्यः दैव्यः सर्वान्देवा ५
नर्हति देवान्पालयितुंक्षमः इत्यर्थः भिषक्मर्त्यस्यध्यान

मात्रेणसर्वरोगशमनादयंचिकित्सकः किंकुर्वन् अंहीश्वस
र्पान्सर्पव्याघ्रादिसर्वानपि सर्वाश्चियातुधान्यः सर्वानपिरा
क्षसानूजंभयन्नाशयन् अथससमाम्नचमाह असौयस्ता
म्रोअरुणउतबभ्रुःसुमंगलः येचेमाᳲंरुद्राअभितोदिक्षु
श्रिताःसहस्रशोवैषाᳲंहेडईमहे योरुद्रःअसौमंडलास्था
दिस्वरूपःसचताम्रःउदयकालेअत्यंतंरक्तःअरुणःउदया
दूर्ध्वमीषद्रक्तःउतअपिचबभ्रुःततोप्यूर्ध्वंपिंगलःएवमन्येपि
वर्णाःतत्कालगताःउन्नेयाः सुमंगलःनानावर्णःसन्तदा

तदांधकारनिवर्त्तनादसंतमंगलः येचान्येरश्मिरूपाःरुद्राः
इमामभितः अस्याभूमेः परितः दिक्षुश्रिताःप्राच्यादिष्ववस्थि
ताः तेवसहस्रशः अनेकसहस्रसंख्याकाः एषामादित्यत
द्रश्मिरूपाणांसर्वेषांरुद्राणांहेडः क्रोधसदृशांवृगीश्महेतंअ
वमहे भक्तिनमस्कारादिनानिवारयामः अथाष्टमामृचमा
ह असौयोवसर्पतिनीलग्रीवोविलोहितः उतैनंगोपा
अदृश्रंनदृश्रंनुदहार्यःउतैनंविश्वाभूतानिसदृष्टोमृडया ६
तिनः योरुद्रोनीलग्रीवकालकूटधारणेननीलवर्णा

ग्रीवायस्यत्र्प्रसोनीलग्रीवः सएववि[illegible]लोहितः विशेषेण
लोहितवर्णः सन्नसौमंडलवती भूत्वाउपसर्पति उदयास्तम
यंसंपादयितुंप्रवर्त्तते तस्यचरुद्रस्यमंडलवर्त्तिस्वरूपधा
रणप्रयोजनमुच्यते उतैनमपिच गोपाः वेदज्ञानसंस्कार
रहिताः गोपाः गोपालका अपि एनंमंडलवर्त्तिनं आदित्यरूपं
रुद्रमदृशन्पश्यंति उदहार्यः उदकाहारिण्योयोषितोप्येनं
मदृशन्पश्यंति उताःपिचैनंमंडलवर्त्तिनमादित्यरूपंरुद्रंवि
श्वाभूतानिगोमहिषादयः सर्वेप्राणिनः पश्यंति सर्वेषांदृश्

नार्थमेवहिरुद्रस्यादिसमूर्त्तिधारणं कैलासाद्दिवर्त्तिरूपंतु
वेदज्ञगस्त्राभिज्ञैरेवदृश्यते नान्यैश्चताद्दृशेणरुद्रः दृष्टः सन्नो
अस्मान्मृडयतिसुखिनः करोति अथनवमामृचमाह
नमो अस्तुनीलग्रीवायसहस्राक्षायमीढुषे अथोयेअस्य
सत्वानोहंतेभ्योकरंनमः यः पूर्वोक्तः नीलग्रीवः सएवेंद्र
मूर्त्तिधारणेनसहस्राक्षेणपुनः पर्जन्यमूर्त्तिधारणेनमी
ढ्वासेचकोवृष्टिकर्त्तस्यर्थः ताद्दृशायरुद्रायनमोस्तु अ ७
थो अपिचयेयेकेचिदस्यरुद्रस्यसत्वानोभृत्यरूपाः प्राणि

नःतेभ्यःसर्वेभ्योहंनमोकारंनमस्करोमि अथदशमामृच
माह प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्यां याश्चतेहस्त
इषवःपराताभगवोवप भगवोहेभगवन्पूजावन्रुद्र
त्वंधन्वनःत्वदीयस्यधनुषःउभयोरार्त्न्योःकोट्योरवस्थि
तांज्यांमौर्वीप्रमुंचअवरोपय याश्चतेहस्तेइषवोवर्त्तंतेता
अपिपरावपपरित्यज अथैकादशामृचमाह अवत
त्यधनुस्त्वं सहस्राक्षशतेषुधे निशीर्यशल्यानांमुखा

शिवोनःसुमनाभव ॥ रूपेणसहस्रसंख्याकान्यक्षी
णियस्यासौसहस्राक्षः शतसंख्याकाइषुधयोबाणस्था
पनकोशाः यस्यासौशतेषुधिः तादृशोहेरुद्र धनुरवततस अ
वरोपितज्याकंकृत्वाशल्यानांबाणानांमुखामुखानिदृशुगत
लोहानां अग्राणिनिशीर्य इषुधिषुन्यग्भावेनहत्वानोअस्मा
न्प्रतिसुमनाः अनुग्रहयुक्तः शिवः शांतोभव ॥ अथदादशा
मन्त्रमाह ॥ विज्यंधनुःकपर्दिनोविशल्योबाणवाँ उत

अनेशन्नस्येषव आभुरस्यनिषंगधिः कपर्दीजटाजूटःसो
स्यास्तीति कपर्दीरुद्रःतस्यधनुःविज्यंविगतज्याकमस्तु उत
अपिचबाणाअस्मिन्स्थिरस्तिष्ठंतीतिबाणवान्इषुधिःस
चविशल्योस्तु सम्यगतानांशल्यानांतदुदरेगोपितत्वेनवहि
राविर्भूतशल्यरहितोस्तु अस्यरुद्रस्यइष वोबाणाइषु
धौप्रक्षिप्ताअनेशन्वेधुमसमर्थाभवंतु अस्यरुद्रस्यनि
षंगधिः बाणाधारआभुरस्तुईषत्सभुरस्तु कुत्यनि
खातशंकावासंजितत्वेनबाणान्धारयितुमेवत्रभवतुन

तुवाणाकर्षणयोग्य इत्यर्थः यद्वा निषंगाथिः खड्गकोशः सो
पि पूर्ववत् क्वचिद्दारोपितत्वेन खड्गं धारयितुमेव प्रभवतु न
तु खड्गाकर्षणसमर्थः अथत्रयोदशामृचमाह
यात्ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः तयास्मान्विश्वतस्त्व
मयक्ष्मया परिभुज हे मीढुष्टम अतिशयेन कामाभिव
र्षक यातै हेतिस्तव संबाधिखड्गादिरूपं यदायुधं यदपि ते त
व हस्ते धनुर्बभूव अयक्ष्मया अनुपद्रवकारिण्या तया हेत्या
तथाविधेन धनुषा च त्वमस्मान्विश्वतः परिभुज सर्वतः प

रिपालय अथचतुर्दशाम्मन्त्वमाह नमस्तेअस्त्वायुधायाना
ततायधृष्णवे उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने हेरू
द्रत्वदीयायआयुधायबाणरूपायनमोस्तुकीदृशायायुधा
यअनाततायधनुषिसंधानाभावादपसारिताय धृष्णवेस्व
रूपेणप्रहर्तुंप्रगल्भायकिंचतेत्वदीयाभ्यांउभाभ्यांबाहुभ्यां
नमोस्तु तथातवत्वदीयायधन्वने अथपंचदशामाम्मन्त्रमा
ह परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः अथोयइषुधि
स्तवारेअस्मन्निधेहितं हेरुद्रतेत्वदीयस्यधन्वनःहेतिर्बाण

नूल्यरूपा अस्मान्विश्वतः सर्वतः परिवृणक्तु वर्जितान्करोतु
माबाधतामित्यर्थः अथो अपिवयस्तवेषुधिः तमस्मद्दूरे अ
स्मत्तोदूरेनिधेहिस्थापय अथषोडनूणमाह नमस्तेअस्तु
भगवान्विश्वेश्वरायमहादेवायत्र्यंबकायत्रिपुरांतकायत्रिका
ग्निकालायकालाग्निरुद्रायनीलकं ॱॱ ठायसर्वेश्वरायसदा
शिवायश्रीमहादेवायनमः अनुसगमं इतिसायणाचार्यवि
रचितेमाधवीयेवेदार्थप्रकाशेतैत्तिरीययजुःसंहितायांचतुर्थकांडे १०
पंचमप्रपाठकेप्रथमोऽनुवाकः प्रथमेणानुवाकेनभवा
नु

गवतोरुद्रस्ययाग्रध्यानभ्रतातनुःइषुःधनुर्हस्तौतान्बकुधात्र
साद्य तस्येत्लीलाविग्रहाजगन्निर्वाहहेतवते ऽष्टभिरनुवाकैः ६६
प्रसाद्यंते तेषुचानुवाकेषुसर्वाण्यपियजूंषितानिचद्विविधा
न्युभयतोनमस्काराण्यन्यतरतोनमस्काराणिच त्रिष्वनुवाके
षुनमस्कारादिकंनमस्कारांतमेकैकंयजुः इतरेषुपंचस्वनु
वाकेषुनमस्कारादिकमेकैकंयजुः तत्र द्वितीयेनुवाकेप्रथमं
यजुमाह नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमः
हिरण्यनिर्मिताद्याभरणानिबाह्वोर्यस्यासौहिरण्यबाहुः स

त्वसंग्रामेसेनांनयतिसेनानीः तादृशामूर्न्निधरोयोरुद्रस्तस्मै
नमोस्तुदिशांचपतयेदिक्पतयेदिशांचपालकोरुद्रस्तस्मैन
मोस्तु अथद्वितीययजुराह नमोवृक्षेभ्योहरिकेशेभ्यःप
शूनांपतयेनमः हरितवर्णाःकेशाःपर्णरूपायेषांवृक्षा
णांतेहरिकेशाःतादृशेभ्योवृक्षेभ्योवृक्षाकाररुद्रमूर्तिभ्योन
मोस्तु योरुद्रःपशूनांपतयेपशूनांपालक स्तस्मैचनमोस्तु
अथतृतीयं नमःसस्पिंजरायत्विषीमतेपथीनांपतयेन ११
मः सस्पिशाद्वोवालतृणवावीजरःशाद्वापीतरक्तःसंकी

र्णवर्णपिंजरः बाणस्तएणवसिंजरसस्पिंजरः सचत्विषीमा
न्दीप्तिमानत्तथाविधरुद्रमर्त्तयेनमोस्तु पथीनांचरन्नास्त्रो
क्तदक्षिणेनतरंत्ततीयमार्गाणांपतिः पालकोयोरुद्रस्तस्मै
नमोस्तु अथचतुर्थं नमोबभ्लुशायविव्याधिनेंनानां
पतयेनमः बिभर्तिरूद्रमितिबभ्लुः वृषभः सएवभ्लुः
तस्मिन्शेतेतिष्ठतीतिबभ्लुशः सचविद्धेषिणेविध्यती
तिविव्याधीत्तथाविधायनमोस्तु पश्चान्नानांपालको
रुद्रस्तस्मैनमोस्तु अथपंचमी नमोहरिकेशायोप

वीतिनेपुष्टानांपतयेनमः नीलालकमूर्धजायपलितं
हरितायउपवीतिनेमंगलार्थयज्ञोपवीतधारिणेरुद्राय
नमोस्तुपुष्टानांपतयेपरिपूर्णगुणानांपुरुषाणांपतयेस्वा
मिनेनमोस्तु अथषष्ठं नमोभवस्यहेत्यैजगतांपतये
नमः भवःसंसारःतस्यहेतिरायुधंसंसारछेत्रेरुद्रायन
मोस्तुजगतांपतयेपालकारुद्रस्तस्मैनमोस्तु अथसप्त
मं नमोरुद्रायाततताविनेक्षेत्राणांपतयेनमः आत
तेनविस्तारितेनधनुषाऽवतिरक्षतिइत्याततावीतस्मैरु १२

द्रायनमोस्तु क्षेत्राणांपतयेपालकोरुद्रस्तस्मैनमोस्तु इं
द्रजःटाकलापिनांपतयेनमोनमोबृषालल्लतायिनांपतये
नमोनमोल्लल्लारवकायिनांपतयेनमोनमोल्ललाल्लत्ता
यिनांपतयेनमोनमोवनानाननतायिनांपतयेनमोनमो
ननानननतायिनांपतयेनमोनमः इतिसुगमं अथाष्टमं
नमःसूतायाहंसायवनानांपतयेनमः सूतःसारथिः
अहंसायवैरिभिर्हंतुमशक्यस्ताहृगायरुद्रायनमोस्तु
यावनानांपालकःतस्मैरुद्राय॰ अथनवमंयजुमाह

नमोरोहिताय स्थपतये वृक्षाणांपतयेनमः ॥ रोहितः लो
हितवर्णः स्थपतिः प्रभुःस्तस्मैरुद्राय० योवृक्षाणांपाल
कःस्तस्मैनमोस्तु ॥ अथदशमंयजुराह ॥ नमोमंत्रिणेवा
णिज्जायकक्षाणांपतयेनमइतिराजसभायांमंत्रालोचन
कुशलोमंत्री सचवणिजांस्वामित्वेनवाणिजःस्तस्मैरु
द्राय० वनगताःगुल्मादयःकक्षाःतेषांपतयेपालका
यनमोस्तु ॥ अथैकादशमंयजुराह ॥ नमोभुवंतयेवारि १२
वस्कृतायोषधीनांपतयेनमइति ॥ भुवंतनोतीतिभुवं

तिः ननुवर्धने वरिवोधनंतस्यकर्त्तावरिवस्कृत् सए
ववारिवस्कृतः तस्मैरुद्रायनमोस्तु ओषधीनांग्राम्यार
एयानांपतयेपालकायतस्मैनमोस्तुते अथद्वादशंय
जुराह नमउच्चैर्घोषायाक्रंदयतेपत्तीनांपतयेनम
इति शुद्धकालेउच्छ्रितोघोषोध्वनिर्यस्यासोउच्चैर्घो
षः आक्रंदयतेवैरिणांरोदपितातस्मैरुद्रायनमोस्तु
पत्तीनांपादचारिणांयोधानांपतिराश्वाद्याश्चाश्चतेषांपालका
यनमोस्तु अथत्रयोदशंयजुराह नमः कृत्स्नवीताय

धावत्तेसत्वनांपतयेनमइत्ति हस्तंसैन्यंवीतंवेष्टितंयेन।
सोहस्तवीतः पलायमानानांपरकीयसैनानांपृष्ठतोग।
छन्धावन्तस्मैरुद्रायनमः सत्वनःसात्विकाःशरणाग
तास्तेषांपालकायपत्तयेनमोस्तु इतिसायणाचार्यविर।
चितायांमाधवीयेवेदार्थप्रकाशेयजुःसंहितायांचतुर्थका।
ण्डेपंचमप्रपाठकेद्वितीयोनुवाकः द्वितीयानुवाकेतु
भयतानमस्काराणिकानिचित् यजूंष्युक्तानिअथापरा ॥१४॥
णितथाविधान्येवतृतीयकानिचिदुच्यंते तत्रतृतीये

अथमंत्रमनुराह नमःसहमानायनिव्याधिनआव्याधि
नीनांपतयनमः सहमानोविरोधिनोभिभवन्नितरां
विरोधिनोविध्यतीतिनिव्याधीताद्दृशायरुद्रायनमोस्तु
आव्याधिनीनांआसमंताद्विध्यंतिआव्याधिन्यःशूराःसे
नाः तासांपतयेपालकायनमः अथद्वितीयमंत्रमाह
नमःककुभायनिषंगिणेस्तेनानांपतयेनमः ककुभा
यककुत्सदृशायप्रधानभूतायेसमर्थः निषंगीखड्गहस्तस्त
स्मैरुद्राय० स्तेनाःगुप्तचोराःतेषांपालकायनमः रुद्रो

ह्लीलयानटवत्तत्तद्वेषंधत्ते यद्वातस्यसर्वजगदात्मकत्वा
द्योयत्रयथावर्त्ततेतत्रतथातद्रूपेणरुद्रएववर्त्ततइतिरुद्रस्य
सार्वात्म्यमनुसंधातुंमंत्रैरेवमुच्यते स्तेनादिशरीरेषुरुद्रेद्धि
धावर्त्तते जीवरूपेणेश्वररूपेणच तत्रयज्जीवरूपंतत्सेना
दिशब्दानांवाच्योर्थः सएवशास्त्रेषुनिंद्यः यत्त्वीश्वररूपंत
त्स्तेनादिशब्दैरुपलक्ष्यते तदनुसंधानंतुपापसक्षयहेतु
त्वेनपरमपुरुषार्थइतिलक्ष्यार्थविवक्षयामंत्रेषुलौकिकाः २१५॥
शब्दाः प्रयुज्यंतइतिद्रष्टव्यं उपलक्षकवाच्यार्थद्वारेणल

क्ष्यार्थोमुग्धैरपिसहसाबोद्धुं शक्यते यथाशाखायांचंद्रइत्य
त्रातस्माल्लक्ष्यार्थस्यैवविवक्षायामपिसुखावबोधद्वारत्वेनमु
ख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः अथतृतीयंयजुराह नमो
निषंगिणइषुधिमंतेतस्कराणांपतयेनमः धनुषिसंधातुं
हस्तेधृतोबाणोनिषंगः पृष्टेबद्धोबाणाधारइषुधिः त
दुभययुक्तायनमः तस्कराः प्रगटचोराः तेषांपालकायन
मः अथचतुर्थंयजुराह नमोवंचतेपरिवंचतेस्तायूनां
पतयेनमः स्वामिनआप्तोभूत्वातदीयक्रयविक्रयव्यव

हारेषुयत्रक्वापियत्किंचिद्द्रव्यापह्नवोवंचनंसर्वेष्वपिव्यव
हारेषुअपन्हवःपरिवंचनंतदुभायरूपायनमः गुप्तचोरा
द्विविधाः दूराद्दागसरात्रावज्ञाताःसंतःकपाटाद्युद्घाटनेनये
द्रव्यहर्त्तारस्तेस्तेनाःस्वकीयाएवभूत्वाराज्ञावहनिवाअन्यैर
ज्ञाताःसंतोपहर्त्तारोयेतेस्तायवःतेषांपालकायनमः अथ
पंचमंयजुराह नमोनिचेरवेपरिचरायारण्यानांपतयेनमः
स्वामिगृहएवकदापरिहरिष्यामीतिअनयाबुध्यासावधानो १६
निरंतरंचरणशीलोनिचेरुः परितःआपणवीथिप्रचारिका

हृद्याद्यावपहारं बुध्वाचरणश्शीलपरिचरः तदुभयरूपायन
मः मार्गगतन्द्रव्यापहारेणबाधितुंनिरतरंअरण्येवर्तमाना
श्चोराः आरण्यास्तेषांपालकायनमः अथषष्ठमयजुःराह
नमस्सृकाविभ्योजिघांसभ्द्योमुष्णतांपतयेनमः सृक
शब्दोवज्रवाचीतेनस्वशरीरंभवंतिरक्षंतीतिसृकाविनः श्रा
त्रिणोहंतुमिच्छंतश्चोराःजिघांसंतः तदुभयरूपायनमः
मूषिकाःसंतःस्वामिधान्यापहर्तारोमुष्णंतस्तेषांपालका
यनमः अथसप्तमयजुःराह नमोसिमभ्द्योनक्तंचरभ्द्यः

अर्हंतानांपतयेनमइति असिमंतःखड्गधारिणोयेरात्रौच
रंतोवीथ्यानिर्गतान्प्राणिनोबाधमानाश्चोराःनक्तंचरंतः
तदुभयरूपायनमःस्तैवापहरंतःअर्हंतास्तेषांपालका
यनमः अथाष्टमंयजुःकारम् नमउष्णीषिणेगिरिचरायकु
लुंचानांपतयेनमः शिरोवेष्टनवानुष्णीषीग्रामेजनवदुष्णी
षेणशिरोवेष्टयित्वातन्मध्येप्रविनूयवर्तमानश्चोराउष्णी
षीगिरौकाष्ठादिसंपादकानांवज्रादिकमपहर्त्तुंचरतीति ४०
गिरिचरः तदुभयरूपायनमःकुंभूमिंक्षेत्ररूपांलुंचंति

अपहरंतीतिकुलुंचाः तेषांपालकायनमः अथनवमप
जुराह नमऋषुमद्भ्योधन्वाविभ्यश्चवोनमः भीषयि
तुंहस्तेवाणधारिणः इषुमंतः तथाभीषयितुंहस्तेधनु
र्धारिणोधन्वाविनः तदुभयरूपाः हेरुद्राः वः युष्मभ्यं
नमः एतत्सर्वभ्रातिविरोधाभासाद्येनमंत्रवाक्यं भेत्तुंद्विर्नम
स्कारः अथदशमंयजुराह नमआतन्वानेभ्यः प्रतिद
धानेभ्यश्चवोनमः धनुषिज्यामारोपयंतः आतन्वानास्त

द्रूपेभ्योवोयुष्मभ्यंरुद्रेभ्योनमः धनुर्बिवाणंसंदधानाःप्रति
दधानाःतद्रूपेभ्योयुष्मभ्यंनमः अथैकादश्यायजुराह नम
आयच्छद्भ्योविसृजद्भ्यश्चवोनमः आकर्षणंकुर्वतःआ
यच्छंतः वाणंविमुंचंतोविसृजंतः शेषंसर्वत्रपूर्ववत्
अथद्वादशायजुराह नमोस्यद्भ्योविध्यद्भ्यश्चवो
नमः मुक्तवाणस्यलक्ष्यपर्यंतंगमनं असनंतस्यक
र्तारोअस्यंतःविद्भ्यश्चवोनमःविध्यंतिताडयंतियेशरैः
अ१

१८

तेभ्योविध्य[illegible]द्भ्यः अथत्रयोदशं यजुराह सत्सद्दशाय

जुः पर्यंतानिस्पष्टार्थान्याह नमआसीनेभ्यः शयानेभ्यश्च

वोनमोनमः स्वपद्भ्योजाग्रद्भ्योश्चवोनमोनमस्तिष्टद्भ्यो

धावद्भ्यश्चवोनमोनमः सभाभ्यः सभापतिभ्यश्चवोनमो

नमोअश्वेभ्योश्वपतिभ्यश्चवोनमोनमः इतिसाय

णाचार्यविरचितेमाध० वेदार्थ० यजुःसंहितायांकांडेप्रप

ठके: तृतीयोनुवाकः ३ तृतीयानुवाकेयान्युभयतोन

मस्काराणियजूंष्युक्तानितेभ्योन्यानिकानिचिदुभयतोन

भस्काराणियजूंषिचतुर्थेभिधीयंतेचतुर्थेनुवाकेप्रथमंय
जुराह नमआव्याधिनीभ्योविविध्यंतीभ्यश्ववोनमः
आसंमंतोद्धंरुरात्काःस्त्रीमूर्तय आव्याधिन्यः विशेषेणवे
धुरात्काःविविध्यंतः अथद्वितीययजुराह नमउगणाभ्य
स्तृंहतीभ्यश्ववोनमः उग्रस्त्रगणरूपाःसप्तमातृका
स्त्रियःउगणाहिंसितुंसमर्थाःदुर्गाद्याःदुर्गादेवतास्तृंह
सः अथतृतीयंयजुराह नमोगृत्सेभ्योगृत्सपतिभ्यश्व ॥१९॥
वोनमः गर्द्धनद्गील्लाःगृत्साःविजयलंपटाइत्यर्थः तेषां

पालकाः गणपतयः अथचतुर्थयजुराह नमोव्रातेभ्यो
व्रातपतिभ्यश्चवोनमः नानाजातीयानांसंघाः व्राताः ते
षांपतयः व्रातपतयः पंचमंयजुराह नमोगणेभ्यइति
देवस्यानुचराः भूतविशेषगणाः तेषांपालकाः गणपतय
इत्यर्थः अथषष्ठमंयजुराह नमोविरूपेभ्योविश्वरूपे
भ्यश्चवोनमः विरूपाः विकृतरूपाः नग्नमुंडादयः वि
श्वरूपाः तुरंगगजवल्कादिनानाविधरूपधारिणो भृत्याः
अथसप्तमंयजुराह नमोमहद्भ्यः क्षुल्लकेभ्यश्चवोन

मः अणिमाद्यैश्वर्योपेतामहांतस्तद्रहिताः क्षुल्लकाः अ
थाष्टमंयजुराह नमोरथिभ्योरथेभ्यश्चवोनमः रथमारू
ढारथिनः तद्रथिता अरथाः अथनवमंयजुराह नमोर
थेभ्योरथपतिभ्यश्चवोनमः इतिस्पष्टार्थः अथदशमं०
नमःसेनाभ्यःसेनानिभ्यश्चवोनमः सेनांनयतीति
अथएकादशं० नमःक्षत्तृभ्यःसंग्रहीतृभ्यश्चवोनमः
रथानांअधिष्टातारः संग्रहीतारः सारथयः अथद्वादशं० ॥२०॥
नमस्तक्षभ्योरथकारेभ्यश्चवोनमः रथंकरोतीतिरथका

रः तक्षःविशेषणएव अथचतुर्दशी॰ नमःकुलालेभ्यः
कर्मारेभ्यश्चवोनमः कुलालःकुंभकाराःकर्मारालोहकाराः
अथचतुर्दश्य नमःपुंजिष्टेभ्योनिषादेभ्यश्चवोनमः
पुंजिष्टाःपक्षिपुंजानांघातकाःजासंतरसंबंधाःपुल्कसाद
यः मत्स्यघातिनःनिषादाः अथपंदशींयजुराह नमइषु
कृभ्योधन्वकृभ्यश्चवोनमः मृगयुरिदंकामयमानइत्ति
यद्वामृगान्कामयंतीत्तिमृगयवःपापर्द्धिकाःतेभ्योमृगयु
भ्यःश्वनांगलबद्धानांपात्रगनांधारकाःश्वनयःअथस

प्र.रु॰ नमःश्वभ्यःश्वपतिभ्यश्चवोनमः अस्यस्पष्टा
र्थः अत्रद्वितीयानुवाकोलीलार्थदेवतामूर्तिप्राधान्येन
प्रवृत्तः तृतीयोनुवाकःवरमूर्तिप्राधान्येन चतुर्थोनुवा
कोनानाजातिप्राधान्येनेतिविभागोद्रष्टव्यः इतिश्रीसा
यणाचार्यविरचिते॰ चतुर्थोनुवाकः नमोभवायचरुद्रा
यचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायचशिति
कंठायचनमःकपर्दिनेचव्युप्तकेशायचनमःसहस्राक्षा ॥२१॥
यचशतधन्वनेचनमोगिरिशायचशिपिविष्टायचनमो

मीढुष्टमायचेषुमतेचनमोह्रस्वायचवामनायचनमोबृहते
चवर्षीयसेचनमोवृद्धायसवृध्वनेचनमोअग्नियायचे
प्रथमायचनमआशवेचाजिरायचनमःशीघ्यायचशीभ्या
यचनमऊर्म्यायचवस्वन्यायचनमःस्रोतस्यायचद्वीप्यायच
चतुर्थेनुवाकेउभयतोनमस्काराणियजूंषिसमापितानि
अथपंचममारभ्यनवमांतेष्वनुवाकेषुनमस्कारोपक्रमाण्य
वयजूंष्याम्नायंते तत्रपंचमानुवाकेप्रथमंयजुरारभ्यपंचदश जु
यजूंष्याह नमोभवायचेसारभ्यनमःस्रोतस्यायचेत्येतानि

पंचदशायजंषितेषा मर्थः भवंतिप्राणिनोस्मादितिभवः
रुद्रोरोदनहेतुभूतंदुःखंद्रावयतीतिरुद्रः शृणातिहिनास्ति
पापमितिशर्वः पशुसमानानज्ञानिनः पुरुषान्पालय
तीतिपशुपतिः कालकूटधारणेननीलवर्णाग्रीवैकदेशो
यस्यासौनीलग्रीवः शितिःश्वेतवर्णोश्रवाशिष्टः कंठप्र
देशोयस्यासौशितिकंठः कपर्दीजटाजूटोयस्यासौकप
र्दी मुंडितकेशोसुसकेशः पाशुपतादिवेषेणकपर्दित्वं
यसादिवेषेणमुंडितकेशत्वं इंद्रवेषेणसहस्राक्षत्वं स ॥२२॥

हस्तभुजावतारेणत्रांत्तसंख्याकैर्धनुर्भिरूपेतत्वं गिरौकै
लासेतिष्ठतीतिगिरित्रः विष्णुमूर्त्तिधारीत्रिपिविष्टः
त्रिपिविष्टोविष्णुरिति श्रुतेः मेघरूपेणसंततंवर्षयिता
मीढुष्टमः बालधारकइषुमान् शरीरे अल्पप्रमाण
त्वंह्रस्वत्वं अंगुल्याद्यवयवसंकोचोवामनत्वं आकारे
णप्रौढोबृहत् गुणैः संमृद्धोवर्षीयान्वयस्याधिको
वृद्धः सम्यक् श्रुतिभिर्वर्धितः संवृद्धः जगदुत्पत्तेः पू
र्वमवस्थितोग्नियः सभायांमुख्यः प्रथमः आशुर्व्या

पी अद्रिः गमनकुशलः शीघ्रियः शीघ्रगांशीभवाङुमी
रकप्रवाहवाबीतत्रावस्थितःशीभ्यः ऊर्म्यः तरंगैरन्वितः
ऊर्म्यः अवस्वनेध्वनिराहितास्मिंजलेस्थितः अवस्वन्यः
स्रोतसिप्रवाहेस्थितः स्रोतस्यः शैकलद्वीपमध्यवर्तिभ
मोस्थितोद्वीप्य अत्रैकस्मिन्यजुषिचतुर्थ्यंतपदाभ्यांनमः
शब्दः प्रयगन्वेतुंसमुच्चयार्थोचकारोपठितो इतिपंच
मोनुवाकः पंचमेनुवाकेकानिचिरन्यतोनमस्कारणिय २३
जुःष्षुक्तानि षष्ठेत्तथाविधान्येवकानिचिद्यजुःष्षु चंते

तत्रविद्यमानानिपंचदशयजूंषिश्राह नमोज्येष्ठायचक
निष्ठायचनमःपूर्वजायचापरजायचनमोमध्यमायचाप
गल्भायचनमोजघन्यायचबुध्नियायचनमःसोभ्याय
चप्रतिसर्यायचनमोयाम्यायचक्षेम्यायचनमउर्वर्याय
चखल्यायचनमः श्लोक्यायचावसान्यायचनमोव
न्यायचकक्ष्यायचनमःश्रवायचप्रतिश्रवायचनम
आशुषेणायचाशुरथायचनमःशूरायचावभिंदते
चनमोवर्मिणेचवरूथिनेचनमोबिल्मिनेचकवचि

नेवनमः श्रुताय च श्रुतसेनाय च अस्यार्थः विद्यैश्वर्या
दिभिरधिकोज्येष्टः तैरहितो अल्पः कनिष्टः पूर्वं जगदा
दौ हिरण्यगर्भरूपेणोत्पन्नः पूर्वजः अपरस्मिन्जगदवसा
नकाले संकुर्तुं कालाग्न्यादिरूपेणोत्पन्नो अपरजः मध्य
मकाले देवतिर्यगादिरूपेणोत्पन्नो मध्यमः अपगल्भो
अरूढेंद्रियो बालः जघने गवादीनां पश्चाद्भागे वत्सादि
रूपेण भवो जघन्यः बुध्ने वृक्षादीनां मूले तृणखादिरूपे ॥२४॥
णासंनो बुध्नियः उभाभ्यां पुण्यपापाभ्यां सह वर्तत इति सो

भ्योमनुष्यल्लोकः अतएवाथर्वणिका आमनंति पुण्येनपु
न ण्यंल्लोकंनयतिपापैपापंउभाभ्यामेवमनुष्यल्लोकमितितत्र
भवः सोभ्यः प्रतिसरोविवाहादौकृस्तेधार्यमाणारक्षाबंधः स्तं
अर्हतीतिप्रातिसर्यः यमलोकेपापिशिक्षकरूपेणभवोया
म्यः क्षेमोमोक्षः तमर्हतीतिक्षेम्यः उर्वरासर्वसस्याढ्याभू
मिः तामर्हतिधान्यविशेषरूपेणसुर्वर्यः खलोधान्यवि
वेचनदेशस्तमर्हतीतिखल्या[illegible]दिरूपेणेतिखल्यः श्लोका
वैदिकमंत्रास्तत्प्रतिपाद्यत्वेनतत्रभवः श्लोक्यः अवसानं

वेदांताः तस्य प्रतिपाद्यत्वेन तत्र भवो ऽवसान्यः वने वृक्षादिरू
पेण भवो वन्यः कक्ष्ये लतादिरूपेण भवः कक्ष्यः श्रवः श्रूयत
इति वाद्दः श्रवः प्रतिध्वनिः आशुषेणः आशु शीघ्रगामि
नी सेना यस्य सः आशुषेणः आशुरथः आशु शीघ्रगामी
रथो यस्य सः आशुरथः शूरो युद्धे धैर्यवान् अवभिंदति वै
रिणं अवभृत् वर्मी कंचुकोपेतः वरूथी रथगृहोपेतः विल्मं
विलोपेतं युद्धे शिरोरक्षकं सदस्यास्तीति वि ल्मी कवचः ॥२५॥
शरीररक्षकं सोस्यास्तीति कवची श्रुतो वेदेषु प्रसिद्धः श्रु

तावेदेषुप्रसिद्धासेनायस्यासोऽश्रुत्तसेनः इतिषष्टोनुवाकः
नमोदुंदुभ्यायचाहन्यायचनमोधृष्णवेचप्रमृशायचनमोदू
तायचप्रहितायचनमोनिषंगिणेचेषुधिमतेचनमस्तीक्ष्णे
षवेचायुधिनेचनमःस्वायुधायचसुधन्विनेचनमःस्रुत्याय
चपथ्यायचनमःकाट्यायचनीप्यायचनमःसूद्यायचसर
स्यायचनमोनाद्यायचवैशंतायचनमःकूप्यायचावटयायचनमोवर्ष्या
यचावर्ष्यायचनमोमेघ्यायचविद्युत्यायचनमईध्रियायचा
तप्यायचनमोवात्यायचरेष्मियायचनमोवास्तव्यायचवा

स्तुपायच अस्यार्थः दुंदुभ्यांभेर्यांभवः शब्दः दुंदुभ्यः आह
न्यतेताडयंते अनेनेसाहननं दुंदुभ्याघातार्थोदंडः तत्रताड
नरूपेणस्यंन्तः आहनन्यः धनुर्युद्धेपलायनरहितः प्रमत्तः
परसैन्यवृत्तांतपरामर्शकः दूतस्तद्वृत्तांतज्ञापनकुशलःप्र
हितःस्वामिनाप्रेषितःपुरुषः निषंगीखड्गयुक्तः इषुधिमा
न् बाणाधारयुक्तः तीक्ष्णाः इषवः यस्यासौतीक्ष्णेषुः बहु
न्यायुधान्यस्यसंतीसायुधी शोभनमायुधंत्रिशूलंयस्या २६
सोस्वायुधः शोभनंधन्वपिनाकरूपंयस्यासोसुधन्वा सु

ति: पादसंचरमात्रयोग्य: क्षुद्रमार्ग: तमर्हतीति स्कस: पथ्यप
हस्तिरथाश्वादिसंचारक्षम: प्रौढमार्ग: तमर्हतीति पथ्य: सैन्या
दि: कुत्सित मटति जलमात्रेति काये अल्पप्रवाहयोग्य: कुल्या
प्रदेश: तत्रजलरूपेणभव: कासय: यस्मिन्प्रदेशेउपबंधा
ज्जलानितिर्यक्भावेनपतंति सप्रदेशोनीप: तमर्हतितत्रस
जलरूपेणावस्थितोनीप्य: स्थूलकर्दमदेश: तत्रसजलरूप:
स्रुघ: सर: प्रसिद्धं तत्रसजलरूप: सरस्य: नदीगतजल
रूपोनाद्य: अल्पपारोवेशंतत्रसजलरूपोवेशंत: कूपस्थ

लरूपः कूप्पः अवटस्थजलरूपो अवटयः वर्षजलरूपो
वर्ष्यः वर्षनिरपेक्षं समुद्रादिजलरूपो वर्ष्यः मेघेषु स्थि
तो मेघ्यः विद्युता सहचरितो विद्युसः ईध्रं निर्मलत्वेन दी
प्यमानं शरदृक्षं तत्र भव ईध्रियः आतपेन सहवृष्टः आ
तप्यः वातेन सहवृष्टः वासः रिष्यंति विनस्यंति भूतान्य
त्रेति रेष्मः प्रलकालः तत्र भवः शर्करादि पाषाणादि सहि
तं वृष्टिजलबिंदुर्षा रेष्मयः वस्तु धनं गवाश्वादि पदार्थ ॥२७॥
रूपं तत्तत्कार्यरूपेणावास्यितेतावास्तव्यः गृहनिर्मणार्थ

भुमिर्वास्कृतमालको वास्तपः इतिसायणाचार्यविरचिते
माधवीयेवेदार्थप्रकाशेसप्तमोनुवाकः ७ तत्रविद्यमाना
निसप्तरुद्रायजूंषि आह नमःसोमायचरुद्रायचनमस्ता
म्रायचारुणायचनमःशंगायचपशुपतयेचनमउग्रायच
भीमायचनमोअग्रेवधायचनमोहंत्रेचहनीयसेचनमो
वृक्षेभ्योहरिकेशेभ्योनमस्तारायचनमःशंभवेचमयोभवे
चनमःशंकरायचमयस्करायच नमःशिवायचशिवत
रायचनमस्तीर्थ्यायचकूल्यायचनमःपार्यायचावार्याय

च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय
च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय
च अस्यार्थः उमया सह वर्तमानः सोमः इति रुद्रो दुःखहेतुं
दुःखं द्रावयति विनाशयतीति रुद्रः आदित्यरूपेणोदयका
ले अत्यंतरक्तस्ताम्रः उदयादूर्ध्वं पिंगलवर्णोरुणः शंसु
खं गमयति प्रापयतीति शंगः पशूनां पालयिता पशुप
तिः विराधिनो नाशयितुं क्रोधयुक्तः उग्रः दर्शनमात्रेण
विरोधीनां भयहेतुर्भीमः अग्रे पुरतो वधोस्यास्तीत्यग्रेवधः २८

एवंदूरेवधःपुरतोदूरेवावर्त्तमानंविरोधिनंअनायासेनैवह
तीत्यर्थः लोकेपियोयत्रविरोधिनंहंतितद्रूपेणायमेवहंता ॥56॥
अतएवेश्वरेणार्जुनंप्रत्युक्तं मयैवैते निहताःपूर्वमेवनि
मित्तमात्रंभवसव्यसाचिन् इतिगीतायां संहारकालेअ
त्तित्वायेनचसर्वेषांहंताहनीयात् हरितवर्णानिकेशासद
शानिपर्णानियेषांतेहरिकेशाः तथाविधायेवृक्षाःकल्प
तरुप्रभृतयःतद्रूपायरुद्रइत्यर्थः तारःप्रणवप्रतिपाद्यः
शंसुखंभावयतिउत्पादयतिइतितारांशुः मयःसुखंभाव

यतीतिमयोभूः एकंविषयसुखंअपरंमोक्षसुखंइतित
योर्विवेकः पित्रादिरूपेणऐहिंलौकिकंसुखंकरोतीतिशं
करः आचार्यशास्त्रादिरूपेणमयोमोक्षसुखंकरोतीतिम
यस्करः साक्षात्सुखकारित्वमेवताभ्यांपादाभ्यांउक्तंएतन्मु
खेनकारयितृत्वंपूर्वाभ्यांपदाभ्यामितिविवेकः शिवःक
ल्याणरूपःस्वयंनिष्कल्मषमित्यर्थः अतिशयेनशिवः ॥२९॥
शिवतरः स्वभक्तानपिनिष्कल्मषान्करोतीत्यर्थः तीर्थे
प्रयागादौसंनिहितस्तीर्थ्यः कूलेनदीतीरेप्रतिष्ठापितलिं

नावतिष्ठतइतिपार्थः अवरेतीरे २

गरूपेणावतिष्ठतइतिकूल्यः पारेसंसारसमुद्रस्यपरतीरे
मुमुक्षुभिर्ध्येयत्वैं असंसारमध्येकाम्यफलप्रदत्वेन अवति
ष्ठतइत्याचार्यः अहृत्वेनमंत्रजपादिरूपेणपापतरणहेतुः
प्रतरणः तत्वज्ञानरूपेणकृत्स्नसंसारोत्तारणहेतुरुत्तरणः
संभवस्यपिसंसारोत्तरणहेतौतत्वज्ञानेनतदुपेक्ष्यकाम्य
कर्मानुष्ठानेनसंसारेपुनरागमनंमातरः तमर्हतीत्यात
र्यः काम्यफलप्रदइत्यर्थः अलंसंपूर्णंयथाभवतितथा
कर्मफलमत्तीत्यलादोजीवः तयोरन्यः पिप्पलंस्वाद्वत्ती

तिश्रुतेः तस्यप्रेरकत्वेनतत्संबंधित्वाद्गालाद्यः त्राष्यंबा
ल्लत्त्एंगंगात्तीरादोउसर्न्नंकुरांकुरादितदर्हतीतित्राष्यः॥
नदीमध्यगतंफेनमर्हत्तीतिफेन्यः प्रवाहमर्हतीतिप्रवा
ह्यः पुरुषः श्रद्धालुः सन्स्नानादितत्परोनिरंतरंगंगाती
रेवर्त्ततेतद्रूपइतिभाष्यादिशब्दानांचतुर्णांतात्पर्यार्थः इति
सायणाचार्यवि० अष्टमानुवाकः नमईरिण्यायचप्र ॥३०॥
पथ्यायच नमःकिंशिलायचक्षयणायचनमःकपर्दिने
चपुलस्त्येयचनमोगो[redacted]यचगृह्यायचनमस्तल्प्यायचगे
ष्ठ्या

स्थायच नमः काट्यायच गह्वरेष्ठायच नमो हृदय्यायच नि
वेष्यायच नमः पांसव्यायच रजस्यायैच नं दिकायच कूष्मांडा
यच नमः परायच परंतपायच नमः परमात्मनायच धूमाय
च नमो हृरायच तारायच नमो वामनायच हरिण्यायच नमः
शिवायच हरिकेशायच नमः शुष्क्यायच हरित्यायच नमो
लोप्यायचोलप्यायच नम ऊर्व्यायच सूर्म्यायच नमः पर्ण्या
यच पर्णशद्यायच नमोऽपगुरमाणायचाभिघ्नतेच नम
आरिखदत्तेच प्रारिखदतेच नमो वः किरिके भ्यो देवानां हृद
नै

येभ्योनमोविक्षीणकेभ्योदेवानां॒हृदयेभ्योनमोविचि
न्वत्केभ्योदेवानां॒हृदयेभ्योनमआनिर्हतेभ्योदेवनां॒हृ
दयेभ्योनमआमीवत्केभ्योदेवानां॒हृदयेभ्यः १ ईरि
णेभवः ईरिण्यः निरुदकेप्रदेशेईरिणमुखरंतत्रभवः ई
रिण्यः प्रपथोवहुभिः सेवितोमार्गः तत्रभवः प्रपथ्यः
कुत्सिताः क्षुद्राशिलायत्रप्रदेशेसताद्देशाः शार्करिलः प्र २१
देशाः किं॒शिलः क्षयस्तोनिवासयोग्योदेशाः कपर्दी
जटाजूटबंधवान् पुलस्तीभक्तानांपुरस्पुरतस्तिष्ठती

सर्थः गवांस्थानं गोष्ठं तत्र भवः गोष्ठ्यः गृहे भवो गृह्यः त
स्मेरवद्धायांग्रायानस्तत्स्थः गेहे प्रासादे भवो गेह्यः कुत्सित
मटति कंटकितस्लतापूर्णं तथा दुःप्रवेशत्वं प्राप्नोतीति दुर्गमार
ण्यविशेषः काटः तत्र भवः काट्यः काटे कूपगह्वरे गुहादो
तिष्ठतीति गह्वरेष्ठः ह्रदेष्वगाधजलेषु भवो ह्रद्यः नि
वेष्यं नीहारजले तत्र भवो निवेष्यः पांसुषु परमाणुष्वव
स्थितः पांसव्यः रजसि विस्पष्टायां धूल्यामवस्थितो
रजस्यः शुष्केषु काष्ठेषु भवः शुष्क्यः हरितमार्द्रं तत्र भ

वाहरित्यः लुप्यतेतृणादिकमस्मिन्निति लोपः कटिनप्र
देशः तत्र भवः लोप्यः उलूपे भव उलूप्यः उर्व्यां पृथिव्यां
भवः उर्व्यः शोभना उर्मयो यस्यां नद्यां मसौ सूर्मिः तत्र भ
वः सूर्म्यः पर्णेषु पत्रेषु भवः पर्ण्यः शुष्काणां पर्णानां स
म मूहः पर्णशादः तत्र भवः पर्णशाद्यः अपगुरमाणः उद्य
तायुधः अभिघ्नन् प्रहरन् आखिद्दत् ईषत् वेदयन् प्र ३२
खिद्दन् असंतं खेदयन् खिद्दद्दैन्ये दैन्यभावं कुर्वते कि
रंति भक्तेभ्यो धनानीति किरका उदारा रुद्रावतारा: तत्र

देवानांहृदयभूताः सर्वदेवप्रियत्वात् तादृशेभ्योवोयुष्मभ्यं
नमः क्षीलेभ्योविपरीताविक्षीणकाः कदाचिदपिक्षयरहि
तादृशार्थः विचिन्वंस्वपेक्षितमर्थंसंपादंतीतिविचिन्वत्काः
आसमंतात्निःशेषेणहृतंपापंयैस्ते आनिर्हताः आसमं
तात्मीनंतिव्याप्नुवंतिइत्यामीवत्काः पंचमानुवाकमार
भ्यनवमांतेष्वनुवाकेषु अभ्यंतरतोनमस्कारात्लिबहुनि
यजूंष्यभिहितानितैः सर्वैः परमेश्वरस्यसर्वात्म्यंप्रतिपा
दयितुमेकैकेनयजुषास्थावरजंगमंचएकैकरूपमभिहि

पं

तं॰ अनुवाकभेदस्तुक्रतोर्वहिः प्रयोगेमंत्रेप्रयोगभेदाभि
प्रायेणद्रष्टव्यः एकैकोनुवाकएकैकोमंत्रः तत्रतस्यपु
रश्चरणादिप्रकारस्तुरुद्रकल्पेभिधास्यंते इतिसा
यं॰ द्वितीयानुवाकेऋग्यजुषामंत्रउच्यंते तत्रप्रथमाम
चमाह द्रापे अंधसस्पतेदरिद्रंनीललोहित एषांपुरु
षाणामेषांपशूनांमाभेर्मारोमोएषांकिंचनाममत्
द्रापयतिकुत्सितांगतिंप्रापयतीतिद्रापिः पापिनोनर ३३
कप्रदानेनकुत्सयतीत्यर्थः अंधोन्नंतस्यपतिःपालको

भक्तानामनंपालयतीत्यर्थः हरिद्रन् अकिंचनःस्वयंविर

क्तइत्यर्थः कंठेनीलोन्यत्रलोहितःनीललोहितः हेरुद्रए

षामस्मदीयानांपुरुषाणांपुत्रपौत्रादीनांएषामस्मदीयानां

पशूनांगोमहिष्यादीनांवसमहं माभेःमाभीषय एषामु

क्तानांसर्वेषांमध्येकिंचनएकमपिवस्तुमारःमागधतुमा

विनस्यत्वित्यर्थः मामाश्रममतमेवरुग्णंभूत अद्वि

तीयमव्ययमाह यातेरुद्रशिवातनूःशिवाविश्वाहभेष

जी शिवारुद्रस्यभेषजीतयानोमृडजीवसे हेरुद्रतेत

याशिवाशंततातनूर्याविधत्तेतयातन्वानोस्माञ्जीवयसे
जीवयितुंम्हरउयसुखयकथंशिवत्वमितितदुच्यते य
स्माद्विवविश्वाह भेषजीतिसर्वेष्वहःसुरोगदारिद्रयादे
शोषधवद्धिनाशहेतुःतस्माच्छिवा किंच यस्माद्रुद्रस्य
तादृशाल्याश्रयेभेषजी औषधरूपाज्ञानप्रदानेनजन्म
मरणादिदुखंविनाशयतितस्मादप्येषाशिवा श्रम ३४
तृतीयामृचमाह इमाः रुद्रायतवसेकपर्दिनेक्षयद्वी
रायप्रभरामहेमतिं यथानःशमसद्विपदेचतुष्पदेविश्वं

पुष्टंग्रामे अस्मिन्ननातुरं यथायेनप्रकारेणनोस्मदीयायद्वि
पदेपुत्रपौत्रादिरूपायमनुष्यायचतुष्पदेगोमहिष्यादिरूपाय
पत्रावेवचनार्भसुखंस्यात् किंच अस्मिन्ग्रामे विश्वंसर्वप्राणि
ज्ञा जातंपुष्टंसुखपूर्णमनातुरमुपद्रवरहितंचयथाभवतितथा
वयंरुद्रायरुद्रार्थमिमांमतिंप्रज्ञाध्ययनादिविषयबुद्धिंप्रभ
रामहे प्रकर्षेणपोषयामः कीदृशायरुद्रायतवसेबलयुक्ता
य अस्मदपेक्षितंकर्तुंसमर्थायेत्यर्थः कपर्दिनेजटाबंध
युक्तायतापसवेषायेत्यर्थः क्षयद्वीरायक्षयमाणाप्रतिप

क्षिपुरुषायपापविनाशायहेतवइत्सर्थः अथचतुर्थीमस्यमा
ह मडानोरुद्रोततनोमयस्कृधिक्षयद्वीरायनमसाविधेम
ते यछंन्वयो अश्वमनुरायजेपितातदस्यामतवरुद्रप्रणीतौ
हेरुद्रनोस्मान्मडयइहलोकेसुखय उत अपिचनोअ
स्माकंपरलोकेपिमयःसुखंकृधिकुरु क्षयद्वीरायक्षपितास्म
दीयपापायतेतुभ्यंनमसानमस्कारेणविधेमपरिचरेमपि
तापालको मनुःप्रजापतिः शंचसुखंचयोश्चदुःखपृथ २५
ग्भावंचयदायजेयत्किंचित्संपादितवान् तत्सर्वंवयंहेरुद्र

तवप्रणीतौप्रणयेस्नेहातिशयेसतिअस्यामप्राप्नुयामअ
थपंचमीमृचमाह मानोमहांतमुतमानोअर्भकं मान
उक्षंतमुतमानउक्षितं मानोवधीःपितरंमोतमातरंप्रिया
मानस्तनुवोरुद्ररीरिषः इतिहेरुद्रनोअस्मदीयंमहांतंपु
रुषंस्थविरंमारिरीषः माहिंसीःअर्भकंबालकंमारिरि
षः किंचनोअस्मदीयंउक्षितंसेचनसमर्थंपुरुषंमारि
रीषः उतअपिच नोअस्मदीयमुक्षितंगर्भस्थंपुरुषं
मारिरीषःनोअस्मदीयंपितरंमावधीः उतअपिचमा

तंरंमावधीः नोअस्मदीयाः प्रियाश्चतनुवः शरीराणि
मारिरिषः अथपंचीमृचामाह मानस्तोकेतनयेमा
नआयुषिमानोगोषुमानोअश्वेषुरीरिषः वीरान्मानो
रुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते हेरुद्रनो
स्मदीयेतोके अपत्यमात्रेतनयेविशेषतःपुत्रेमारीरिषः
व्याः रुसीअस्माकंतोके पुत्रपौत्रविषयेमाहिंरुसीः तनये
विशेषतः पुत्रेणमारीरिषः हिंहिंसामाकुरु मानोनि ३६
बध्येनोस्मदीयआयुषिमारीरिषः नोस्मदीयेषुगोषु

मारारिषः नोस्मदीयेषुअश्वेषुमारीरिषः भामितःभामः
क्रुद्धःसन्नोस्मदीयान्वीरान्भटस्यान्मावधीःवयंहवि
ष्मंतोहविर्युक्ताःतेतुभ्यंनमसानमस्कारेणविधेमपरि
चरेम अथसप्तमीमृचमाह आरात्तेगोघ्नउतपुरुषघ्नेक्ष
यद्वीरासुम्नमस्मेते अस्तु रक्षाचनो अधिचदेवब्रूह्य
धाचनः शर्मयच्छद्विबर्हाः गोघ्नेगोघ्नस्यपुरुषघ्नेपु
त्रपौत्रादिपुरुषघ्नस्यक्षयद्वीरायक्षपितभटस्यतेत
वोग्रस्वरूपं आरात्तदस्तु मपिदूरेतिष्ठतु यत्तुसु

न्नं त्वदीयं सुखकरं स्वरूपं तदस्मै अस्माकं स्वस्त्यै घोरान्निविसेतश
रीरद्वयमुक्तं द्वयोर्मध्ये यत्तयोरं तद्दूरे गच्छतु शिवं शरीरम
त्रागच्छत्विसर्थः किंच नोऽस्मान् रक्ष सर्वतः पालय किंच हे
देव अधिब्रूहि अस्मान् नितरयजमानेभ्यो अधिकान्देवेषु
ब्रूहि अधिकं वद अपि च द्विबर्हाः द्वयोर्लोकयोर्वर्द्धयिता
त्वं शर्म यच्छ सुखं देहि अथास्मिन्मन्त्रमाह स्तुहि श्रुतं
गर्त्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं मृडा जरित्रे रुद्रस्त ३७
वानो अन्यं ते अस्मन्निवपंतु सेनाः हे मदीयाः वचः श्रुतं स्प

स्तुहि कीदृशं गर्त्तसदं गर्त्तसदृशे हृदयपुंडरीके सर्वदा तिष्ठंतं
ईशावास्यमिदं सर्वं यत्किंचिज्जगत्यां जगत् ईश्वरः सर्वभूता
नां हृद्देशेऽर्जुन तिष्ठति इति स्मृतेः युवानं नित्यतरुणं मुप
हत्नुमुग्रं प्रलयकाले सर्वं जगत् संहर्त्तुं उग्ररूपधारिणं तत्र
दृष्टांतः भीमं मृगं न भीमं भयंकरं सिंहमिव यथा गजानां विदार
णाय उग्रः सिंहो भवति तद्वत् हे रुद्र स्तवानो अस्मद्वचसा
